# Shri Nityanandasvamikrita Shrihari Prarthana

# श्रीनित्यानन्दस्वामिकृता श्रीहरिप्रार्थना

## Document Information

Text title : Shri Nityanandasvamikrita Shrihari Prarthana

File name : nityAnandasvAmikRRitAshrIhariprArthanA.itx

Category : vishhnu, svAminArAyaNa, krishna, aShTaka

Location : doc_vishhnu

Author : nityAnandasvAmi

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# श्रीनित्यानन्दस्वामिकृता श्रीहरिप्रार्थना

त्वद्रूपस्य सुनिश्चयो मनसि मे सर्वोत्तमः स्यात्सदा
त्वत्सौख्येन सुखी भवेयमनिशं नैवेतरेण क्वचित् ।
त्वद्भिन्नाकृतयश्च सन्त्वतितरां तुच्छाः कृता मायया
याचे त्वामिति सन्ततं कृतनतिस्तद्देहि मे श्रीहरे ॥ १॥

त्वय्येकान्तिकभक्तिरस्त्वविचला माहात्म्ययुग् धर्म
प्रत्यूहान्मदनाद्यधर्मकुलतस्तत्रावनं मे कुरु ।
ज्ञानादौ च दृढस्थितिं वृषकुले तस्यां सहाये परे
याचे त्वामिति सन्ततं कृतनतिस्तद्देहि मे श्रीहरे ॥ २॥

प्रेष्ठानां तव सङ्गमोऽस्त्वनुदिनं कान्तिकानां सतां
शुष्कज्ञान्युपधर्मिकौलमतिनां सङ्गो न मे स्यात् क्वचित् ।
भक्तत्वे क्व च दोषलेश इह ते नैवावशिष्येत मे
याचे त्वामिति सन्ततं कृतनतिस्तद्देहि मे श्रीहरे ! ॥ ३॥

द्रोहस्ते तव सेविनां च महतां न स्याद्धृदापि क्वचित्
तिष्ठेन्नैव च वासनान्यविषया त्वत्सेवनान्मे हृदि ।
कुर्यां दास्यमहं तवान्तिकगतो नित्यं सतां वाञ्छितं
याचे त्वामिति सन्ततं कृतनतिस्तद्देहि मे श्रीहरे ! ॥ ४॥

देहे दैहिक आत्मता च ममता न स्यादिह क्वापि मे
सा तु स्यात्त्वयि भक्तिधर्मतनये त्वद्भक्तिनिष्ठेषु च ।
स्नेहः स्यादधिकोऽक्षरे विलसति ब्रह्मात्मनो मे त्वयि
याचे त्वामिति सन्ततं कृतनतिस्तद्देहि मे श्रीहरे ! ॥ ५॥

विश्वासस्तव वाचि मेऽस्तु कुहुचित्स्यान्नास्तिकत्वं न मे
सल्लक्ष्माण्यखिलानि सन्तु मयि तान्युक्तानि यानि त्वया ।
न स्यान्मे क्वचिदासुरत्वमव मां तद्धेतुलोभादितो
याचे त्वामिति सन्ततं कृतनतिस्तद्देहि मे श्रीहरे ! ॥ ६॥

यत्कार्येषु रुचिर्यथा तव तथैव स्याद्रुचिस्तेषु मे
कारुण्यं हृदि वर्ततां मम विभो सर्वेषु देहिष्वपि ।
भक्ताभीष्टद रक्षणं कुरु सदा मोहात् प्रमादाच्च मे
याचे त्वामिति सन्ततं कृतनतिस्तद्देहि मे श्रीहरे ! ॥ ७॥

नित्यं त्वद्वपुरीक्षणे मम दृशौ स्यातां च सङ्कीर्तने
वाणी ते यशसां कथाश्रुतिपरौ कर्णौ मनश्च स्मृतौ ।
सेवायां तव ते सतां च निरतौ हस्तौ त्वदीयस्य मे
याचे त्वामिति सन्ततं कृतनतिस्तद्देहि मे श्रीहरे ! ॥ ८॥

इति श्रीनित्यानन्दस्वामिकृता श्रीहरिप्रार्थना सम्पूर्णा ।

*Shri Nityanandasvamikrita Shrihari Prarthana*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*